# आदित्यकवचम्

ॐ अस्य श्रीमदादित्यकवचस्तोत्रमहामन्त्रस्य याज्ञवल्क्यो महर्षिः ।
अनुष्टुप्-जगतीच्छन्दसी । घृणिरिति बीजम् । सूर्य इति शक्तिः ।
आदित्य इति कीलकम् । श्रीसूर्यनारायणप्रीत्यर्थे जपे विनियोगः ।
ध्यानं
उदयाचलमागत्य वेदरूपमनामयम् ।
तुष्टाव परया भक्त्या वालखिल्यादिभिर्वृतम् ॥ १॥

देवासुरैस्सदा वन्द्यं ग्रहैश्च परिवेष्टितम् ।
ध्यायन् स्तुवन् पठन् नाम यस्सूर्यकवचं सदा ॥ २॥

घृणिः पातु शिरोदेशं सूर्यः फालं च पातु मे ।
आदित्यो लोचने पातु श्रुती पातु प्रभाकरः ॥ ३॥

घ्राणं पातु सदा भानुः अर्कः पातु मुखं तथा ।
जिह्वां पातु जगन्नाथः कण्ठं पातु विभावसुः ॥ ४॥

स्कन्धौ ग्रहपतिः पातु भुजौ पातु प्रभाकरः ।
अहस्करः पातु हस्तौ हृदयं पातु भानुमान् ॥ ५॥

मध्यं च पातु सप्ताश्वो नाभिं पातु नभोमणिः ।
द्वादशात्मा कटिं पातु सविता पातु सृक्किणी ॥ ६॥

ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः ।
जङ्घे पातु च मार्ताण्डो गलं पातु त्विषाम्पतिः ॥ ७॥

पादौ ब्रध्नस्सदा पातु मित्रोऽपि सकलं वपुः ।
वेदत्रयात्मक स्वामिन् नारायण जगत्पते ।
अयातयामं तं कञ्चिद्वेदरूपः प्रभाकरः ॥ ८॥

स्तोत्रेणानेन सन्तुष्टो वालखिल्यादिभिर्वृतः ।
साक्षाद्वेदमयो देवो रथारूढस्समागतः ॥ ९॥

तं दृष्ट्वा सहसोत्थाय दण्डवत्प्रणमन् भुवि ।
कृताञ्जलिपुटो भूत्वा सूर्यस्याग्रे स्थितस्तदा ॥ १० ॥

वेदमूर्तिर्महाभागो ज्ञानदृष्टिर्विचार्य च ।
ब्रह्मणा स्थापितं पूर्वं यातयामविवर्जितम् ॥ ११ ॥

सत्त्वप्रधानं शुक्लाख्यं वेदरूपमनामयम् ।
शब्दब्रह्ममयं वेदं सत्कर्मब्रह्मवाचकम् ॥ १२ ॥

मुनिमध्यापयामास प्रथमं सविता स्वयम् ।
तेन प्रथमदत्तेन वेदेन परमेश्वरः ॥ १३ ॥

याज्ञवल्क्यो मुनिश्रेष्ठः कृतकृत्योऽभवत्तदा ।
ऋगादिसकलान् वेदान् ज्ञातवान् सूर्यसन्निधौ ॥ १४ ॥

इदं प्रोक्तं महापुण्यं पवित्रं पापनाशनम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ।
वेदार्थज्ञानसम्पन्नस्सूर्यलोकमावप्नुयात् ॥ १५ ॥

इति स्कान्दपुराणे गौरीखण्डे आदित्यकवचं समाप्तम् ।

Proofread by PSA Easwaran

*Aditya Kavacham*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*

All PDF Collection
PDF Seva
Download All Type PDF: https://pdfseva.com/